# Anahateshvarasammohana or Ishvarasammohana Kavacham

# અનાહતેશ્વરસમ્મોહન અથવા ઈશ્વરસમ્મોહનકવચમ્

## Document Information

Text title : Anahateshvarasammohana or Ishvarasammohana Kavacham

File name : anAhateshvarasammohanakavacham.itx

Category : shiva, kavacha

Location : doc_shiva

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 2 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 2 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : September 14, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 14, 2020

*sanskritdocuments.org*

# અનાહતેશ્વરસમ્મોહન અથવા ઈશ્વરસમ્મોહનકવચમ્

અથ ત્રિષષ્ટિતમઃ પટલઃ
આનન્દભૈરવી ઉવાચ
કવચં શૃણુ ચાસ્યૈવ લોકનાથ શિવાપતે ।
ઈશ્વરસ્ય પરં બ્રહ્મ નિર્વાણયોગદાયકમ્ ॥ ૬૩-૧॥

કવચં દુર્લભં લોકે નામસમ્મોહનં પરમ્ ।
કવચં ધ્યાનમાત્રેણ નિર્વાણફલભાગ્ભવેત્ ॥ ૬૩-૨॥

અસ્ય કિં(પુ)ત્વત્રમાહાત્મ્યં તથાપિ તદ્વદામ્યહમ્ ।
કેવલં ગ્રન્થિભેદાય નિજદેહાનુરક્ષણાત્ ॥ ૬૩-૩॥

સર્વેષામપિ યોગેન્દ્ર દેવાનાં યોગિનાં તથા ।
ભાવાદિ સિદ્ધિલાભાય કાયનિર્મલસિદ્ધયે ॥ ૬૩-૪॥

પ્રકાશિતં મહાકાલ તવ સ્નેહવશાદપિ ।
સર્વે મન્ત્રાઃ પ્રસિદ્ધ્યન્તિ સમ્મોહકવચાશ્રયાઃ ॥ ૬૩-૫॥

કવચસ્ય ઋષિર્બ્રહ્મા છન્દોઽનુષ્ટુબુદાહૃતમ્ ।
ઈશ્વરો દેવતા પ્રોક્તસ્તથા શક્તિશ્ચ કાકિની ॥ ૬૩-૬॥

કીલકં ક્રૂં તથા જ્ઞેયં ધ્યાનસાધનસિદ્ધયે ।
હૃદબ્જભેદનાર્થે તુ વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૬૩-૭॥

એતચ્છ્રીસમ્મોહનમહાકવચસ્ય બ્રહ્મા ઋષિરનુષ્ટુપ્ છન્દઃ
ઈશ્વરો દેવતા કાકિની શક્તિઃ ક્રૂં કીલકં
ધ્યાનસાધનસિદ્ધયે હૃદબ્જભેદાર્થે જપે વિનિયોગઃ ।
પ્રણવો મે પાતુ શીર્ષં લલાટં ચ સદાશિવઃ ।
પ્રાસાદો હૃદયં પાતુ બાહુયુગ્મં મહેશ્વરઃ ॥ ૬૩-૮॥

પૃષ્ઠં પાતુ મહાદેવ ઉદરં કામનાશનઃ ।
પાર્શ્વૌ પાતુ કામરાજો બાલઃ પૃષ્ઠતલાન્તરમ્ ॥ ૬૩-૯॥

કુક્ષિમૂલં મહાવીરો લલિતાપતિરીશ્વરઃ ।
મૃત્યુઞ્જયો નીલકણ્ઠો લિઙ્ગદેશં સદાવતુ ॥ ૬૩-૧૦॥

લિઙ્ગાધો મુદ્રિકા પાતુ પાદયુગ્મમુમાપતિઃ ।
અઙ્ગુષ્ઠં પાતુ સતતં પાર્વતીપ્રાણવલ્લભઃ ॥ ૬૩-૧૧॥

ગુલ્ફં પાતુ ત્ર્યમ્બકશ્ચ જાનુની યુવતીપતિઃ ।
ઊરુમૂલં સદા પાતુ મઞ્જુઘોષઃ સનાતનઃ ॥ ૬૩-૧૨॥

સિમની દેશમાપાતુ ભૈરવઃ ક્રોધભૈરવઃ ।
લિઙ્ગદેશોદ્ગમં પાતુ લિઙ્ગરૂપી જગત્પતિઃ ॥ ૬૩-૧૩॥

હૃદયાગ્રં સદા પાતુ મહેશઃ કાકિનીશ્વરઃ ।
ગ્રીવાં પાતુ વૃષસ્થશ્ચ કણ્ઠદેશં દિગમ્બરઃ ॥ ૬૩-૧૪॥

લમ્બિકાં પાતુ ગણપો નાસિકાં ભવનાશકઃ ।
ભ્રૂમધ્યં પાતુ યોગીન્દ્રઃ મહેશઃ પાતુ મસ્તકમ્ ॥ ૬૩-૧૫॥

મૂર્ધ્નિદેશં મુનીન્દ્રશ્ચ દ્વાદશસ્થો મહેશ્વરઃ ।
દ્વાદશામ્ભોરુહં પાતુ કાકિનીપ્રાણવલ્લભઃ ॥ ૬૩-૧૬॥

નાભિમૂલામ્બુજં પાતુ મહારુદ્રો જગન્મયઃ ।
સ્વાધિષ્ઠાનામ્બુજં પાતુ સદા હરિહરાત્મકઃ ॥ ૬૩-૧૭॥

મૂલપદ્મં સદા પાતુ બ્રહ્મેન્દ્રો ડાકિનીશ્વરઃ ।
કુણ્ડલીં સર્વદા પાતુ ડાકિની યોગિનીશ્વરઃ ॥ ૬૩-૧૮॥

કુણ્ડલી માતૃકા પાતુ વટુકેશઃ શિરોહરઃ ।
રાકિણીવિગ્રહં પાતુ વામદેવો મહેશ્વરઃ ॥ ૬૩-૧૯॥

પઞ્ચાનનઃ સદા પાતુ લાકિનીવજ્રવિગ્રહમ્ ।
સ્વસ્થાનં દ્વાદશારઞ્ચ વીરઃ પાતુ સુકાકિનીમ્ ॥ ૬૩-૨૦॥

વીરેન્દ્રઃ કર્ણિકાં પાતુ દ્વાદશારં વિષાશનઃ ।
ષોડશારં સદા પાતુ ક્રોધવીરઃ સદાશિવઃ ॥ ૬૩-૨૧॥

માં પાતુ વજ્રનાથેશોઽરિભયાત્ ક્રોધભૈરવઃ ।
ષટ્ચક્રં સર્વદા પાતુ લાકિનીશ્રીસદાશિવઃ ॥ ૬૩-૨૨॥

ષોડશામ્ભોરુહાન્તસ્થં પાતુ ધૂમ્રાક્ષપાલકઃ ।

દિઙ્નાથેશો મહાકાયો માં પાતુ પરમેશ્વરઃ ।
આકાશગઙ્ગાજટિલો દ્વિદલં પાતુ મે પરમ્ ।
ગઙ્ગાધરઃ સદા પાતુ હાકિનીં પરમેશ્વરઃ ॥ ૬૩-૨૩॥

હાકિની પરશિવો મે ભ્રૂપદ્મં પરિરક્ષતુ ।
દણ્ડપાણીશ્વરઃ પાતુ મનોરૂપં દ્વિપત્રકમ્ ॥ ૬૩-૨૪॥

સાધુકેશઃ સદા પાતુ મનોન્મન્યાદિવાસિનમ્ ।
પિઙ્ગાક્ષેશઃ સદા પાતુ ભયભૂમૌ તનૂં મમ ॥ ૬૩-૨૫॥

ઉન્મનીસ્થાનકં પાતુ રોધિનીસહિતં મમ ।
સુધાઘટઃ સદા પાતુ મમાનન્દાદિદેવતામ્ ॥ ૬૩-૨૬॥

આનન્દભૈરવઃ પાતુ ગૂઢદેશાધિદેવતામ્ ।
માયામયોપહા પાતુ સુષુમ્નાનાડિકાકલામ્ ॥ ૬૩-૨૭॥

ઇડાકલાધરં પાતુ કોટિસૂર્યપ્રભાકરઃ ।
પિઙ્ગલામિહિરં પાતુ ચન્દ્રશેખર ઈશ્વરઃ ॥ ૬૩-૨૮॥

કોટિકાલાનલસ્થાનં સુષુમ્નાયાં સદાવતુ ।
સુધાસમુદ્રો માં પાતુ રત્નકોટિમણીશ્વરઃ ॥ ૬૩-૨૯॥

શિવનાથઃ સદા પાતુ કુણ્ડલીચક્રમેવ મે ।
વિષ્ણુચક્રં મહાદેવઃ કાલરાત્રઃ કુલાન્વિતમ્ ॥ ૬૩-૩૦॥

મૃત્યુજેતા સદા પાતુ સહસ્રારં સદા મમ ।
સહસ્રદલગં શમ્ભું સ્વયમ્ભૂઃ પાતુ સર્વદા ॥ ૬૩-૩૧॥

સર્વરૂપિણમીશાનં પાતુ શર્વો હિ સર્વદા ।
સર્વત્ર સર્વદા પાતુ શ્રીનીલકણ્ઠ ઈશ્વરઃ ॥ ૬૩-૩૨॥

સર્વબીજસ્વરૂપો મે બીજમાલાં સદાવતુ ।
માતૃકાં સર્વબીજેશો માતૃકાર્ણં શિવો મમ ॥ ૬૩-૩૩॥

અહઙ્કારં હરઃ પાતુ કરમાલાં સદા મમ ।
જલેઽરણ્યે મહાભીતૌ પર્વતે શૂન્યમણ્ડપે ॥ ૬૩-૩૪॥

વ્યાઘ્રભલ્લૂકમહિષપશ્વાદિભયદૂષિતે ।
મહારણ્યે ઘોરયુદ્ધે ગગને ભૂતલેઽતલે ॥ ૬૩-૩૫॥

અત્યુત્કટે શસ્ત્રઘાતે શત્રુચૌરાદિભીતિષુ ।

મહાસિંહભયે ક્રૂરે મત્તહસ્તિભયે તથા ॥ ૬૩-૩૬॥

ગ્રહવ્યાધિમહાભીતૌ સર્પભીતૌ ચ સર્વદા ।
પિશાચભૂતવેતાલબ્રહ્મદૈત્યભયાદિષુ ॥ ૬૩-૩૭॥

અપવાદાપવાદેષુ મિથ્યાવાદેષુ સર્વદા ।
કરાલકાલિકાનાથઃ પ્રચણ્ડઃ પ્રખરઃ પરઃ ॥ ૬૩-૩૮॥

ઉગ્રઃ કપર્દી ભીદંષ્ટ્રી કાલાચ્છિન્નકરઃ કવિઃ ।
ક્રોધાચ્છિન્નો મહોન્મત્તો ગરુડીશો મહેશભૃત ॥ ૬૩-૩૯॥

પઞ્ચાનનઃ પઞ્ચરશ્મિઃ પાવનઃ પાવમાનકઃ ।
શિખા માત્રામહામુદ્રાધારકઃ ક્રોધભૂપતિઃ ॥ ૬૩-૪૦॥

દ્રાવકઃ પૂરકઃ પુષ્ટઃ પોષકઃ પારિભાષિકઃ ।
એતે પાન્તુ મહારુદ્રા દ્વાવિંશતિમહાભયે ॥ ૬૩-૪૧॥

એતે સર્વે શક્તિયુક્તા મુણ્ડમાલાવિભૂષિતાઃ ।
અહઙ્કારેશ્વરાઃ ક્રુદ્ધા યોગિનસ્તત્ત્વચિન્તકાઃ ॥ ૬૩-૪૨॥

ચતુર્ભુજા મહાવીરાઃ ખડ્ગખેટકધારકાઃ ।
કપાલશઙ્ખમાલાઢ્યા નાનારત્નવિભૂષિતાઃ ॥ ૬૩-૪૩॥

કિઙ્કિણીજાલમાલાઢ્યા હેમનૂપુરરાજિતાઃ ।
નાનાલઙ્કારશોભાઢ્યાશ્ચન્દ્રચૂડાવિભૂષિતાઃ ॥ ૬૩-૪૪॥

સદાનન્દયુતાઃ શ્રીદા મોક્ષદાઃ કર્મયોગિનામ્ ।
સર્વદા ભગવાન્ પાતુ ઈશ્વરાઃ પાન્તુ નિત્યશઃ ॥ ૬૩-૪૫॥

બ્રહ્મા પાતુ મૂલપદ્મં શ્રીવિષ્ણુઃ પાતુ ષડ્દલમ્ ।
રુદ્રઃ પાતુ દશદલમીશ્વરઃ પાત્વનાહતમ્ ॥ ૬૩-૪૬॥

સદાશિવઃ પાતુ નિત્યં ષોડશારં સદા મમ ।
પરો દ્વિદલમાપાતુ ષટ્શિવાઃ પાન્તુ નિત્યશઃ ॥ ૬૩-૪૭॥

અપરાઃ પાન્તુ સતતં મમ દેહં કુલેશ્વરાઃ ।
પૂર્ણં બ્રહ્મ સદા પાતુ સર્વાઙ્ગં સર્વદેવતાઃ ॥ ૬૩-૪૮॥

કાલરૂપી સદા પાતુ મનોરૂપી શિરો મમ ।
આત્મલીનઃ સદા પાતુ લલાટં વેદવિત્પ્રભુઃ ॥ ૬૩-૪૯॥

વારાણસીશ્વરઃ પાતુ મમ ભ્રૂમધ્યપીઠકમ્ ।
યોગિનાથઃ સદા પાતુ મમ દન્તાવલિં દૃઢમ્ ॥ ૬૩-૫૦॥

ઓષ્ઠાધરૌ સદા પાતુ ઝિલ્ટીશો ભૌતિકેશ્વરઃ ।
નાસાપુટદ્વયં પાતુ ભારભૂતીશોઽતિથીશ્વરઃ ॥ ૬૩-૫૧॥

ગણ્ડયુગ્મં સદા પાતુ સ્થાણુકેશો હરેશ્વરઃ ।
કર્ણદેશં સદા પાતુ અમરોઽર્ધીશ્વરો મમ ॥ ૬૩-૫૨॥

મહાસેનેશ્વરસ્તુણ્ડં મમ પાતુ નિરન્તરમ્ ।
શ્રીકણ્ઠાદિમહારુદ્રાઃ સ્વાઙ્ગગ્રન્થિષુ માતૃકાઃ ॥ ૬૩-૫૩॥

માં પાતુ કાલરુદ્રશ્ચ સર્વાઙ્ગ કાલસંક્ષયઃ ।
અકાલ તારકઃ પાતુ ઉદરં પરિપૂરકઃ ॥ ૬૩-૫૪॥

અગસ્ત્યાદિમુનિશ્રેષ્ઠાઃ પાન્તુ યોગિન ઈશ્વરાઃ ।
શ્રીનાથેશ્વર ઈશાનઃ પાતુ મે સૂક્ષ્મનાડિકાઃ ॥ ૬૩-૫૫॥

ત્રિશૂલી પાતુ પૂર્વસ્યાં દક્ષિણે મૃત્યુનાશનઃ ।
પશ્ચિમે વારુણીમત્તો મહાકાલઃ સદાઽવતુ ॥ ૬૩-૫૬॥

ઉત્તરે ચાવધૂતેશો ભૈરવઃ કાલભૈરવઃ ।
ઈશાને પાતુ શાન્તીશો વાયવ્યાં યોગિવલ્લભઃ ॥ ૬૩-૫૭॥

મરુત્કોણે દૈત્યહન્તા પાતુ માં સતતં શિવઃ ।
વહ્નિકોણે સદા પાતુ કાલાનલમુખામ્બુજઃ ॥ ૬૩-૫૮॥

ઊર્ધ્વં બ્રહ્મા સદા પાતુ અધોઽનન્તઃ સદાઽવતુ ।
સર્વદેવઃ સદા પાતુ સર્વદેહગતં સુખમ્ ॥ ૬૩-૫૯॥

ઇહાર્હા વલ્લભઃ પાતુ કાલાખ્યેશો ગુણો મમ ।
રવિનાથઃ સદા પાતુ હૃદયં માનસં મમ ॥ ૬૩-૬૦॥

ચન્દ્રેશઃ પાતુ સતતં ભ્રૂમધ્યં મમ કામદઃ ।
વજ્રદણ્ડધરઃ પાતુ રક્તાઙ્ગેશસ્ત્રિલોચનમ્ ॥ ૬૩-૬૧॥

બુધશ્યામસુન્દરેશઃ પાતુ મે હૃદયસ્થલમ્ ।
સુવર્ણવર્ણગુર્વીશો મમ કણ્ઠં સદાઽવતુ ॥ ૬૩-૬૨॥

સિન્દૂરજલદચ્છન્નાદ્યર્કશુક્રેશ્વરો ગલમ્ ।
નાભિદેશં સદા પાતુ શનિશ્યામેશ ઈશ્વરઃ ॥ ૬૩-૬૩॥

રાહુઃ પાતુ મહાવક્ત્રઃ કેવલં મુખમણ્ડલમ્ ।
કેતુઃ પાતુ મહાકાયઃ સદા મે ગુહ્યદેશકમ્ ॥ ૬૩-૬૪॥

ઇન્દ્રાદિદેવતાઃ પાન્તુ પરિવારગણૈર્યુતાઃ ।
શિરોમણ્ડલદિગ્રૂપં પાન્તુ વૈકુણ્ઠવાસિનઃ ॥ ૬૩-૬૫॥

ભૈરવા ભૈરવીયુક્તાઃ સર્વદેહસમુદ્ભવાઃ ।
ભીમદંષ્ટ્રા મહાકાયા મમ પાન્તુ નિરન્તરમ્ ॥ ૬૩-૬૬॥

યજ્ઞભુઙ્નીલકણ્ઠો મે હૃદયં પાતુ સર્વદા ।
ઉન્મત્તભૈરવાઃ પાન્તુ ઈશ્વરાઃ પાન્તુ સર્વદા ॥ ૬૩-૬૭॥

ક્રોધભૂપતયઃ પાન્તુ શ્રીમાયામદનાન્વિતાઃ ।
ફલશ્રુતિકથનં
ઇત્યેતત્ કવચં તારં તારકબ્રહ્મમઙ્ગલમ્ ॥ ૬૩-૬૮॥

કથિતં નાથ યત્નેન કુત્રાપિ ન પ્રકાશિતમ્ ।
તવ સ્નેહવશાદેવ પ્રસન્નહૃદયાન્વિતા ॥ ૬૩-૬૯॥

કૃપાં કુરુ દયાનાથ તવૈવ કવચાદ્ભુતમ્ ।
હિતાય જગતાં મોહવિનાશાયામૃતાય ચ ॥ ૬૩-૭૦॥

પઠિતવ્યં સાધકેન્દ્રૈર્યોગીન્દ્રૈરુપવન્દિતમ્ ।
દુર્લભં સર્વલોકેષુ સુલભં તત્ત્વવેદિભિઃ ॥ ૬૩-૭૧॥

અસાધ્યં સાધયેદેવ પઠનાત્ કવચસ્ય ચ ।
ધારણાત્ પૂજનાત્ સાક્ષાત્ સર્વપીઠફલં લભેત્ ॥ ૬૩-૭૨॥

કાકચઞ્ચુપુટં કૃત્વા સપ્તધા પઞ્ચધાપિ વા ।
કવચં પ્રપઠેદ્વિદ્વાન્ ગૂઢસિદ્ધિનિબન્ધનાત્ ॥ ૬૩-૭૩॥

કાકિનીશ્વરસંયોગં સુયોગં કવચાન્વિતમ્ ।
ઈશ્વરાઙ્ગં વિભાવ્યૈવ કલ્પવૃક્ષસમો ભવેત્ ॥ ૬૩-૭૪॥

એતત્કવચપાઠેન દેવત્વં લભતે ધ્રુવમ્ ।
આરોગ્યં પરમં જ્ઞાનં મોહનં જગતાં વશમ્ ॥ ૬૩-૭૫॥

સ્તમ્ભયેત્ પરસૈન્યાનિ પઠેદ્વારત્રયં યદિ ।
શાન્તિમાપ્નોતિ શીઘ્રં સ ષટ્કર્મકરણક્ષમઃ ॥ ૬૩-૭૬॥

આકાઙ્ક્ષારસલાલિત્યવિષયાશાવિવર્જિતઃ ।
સાધકઃ કામધેનુઃ સ્યાદિચ્છાદિસિદ્ધિભાગ્ભવેત્ ॥ ૬૩-૭૭॥

સર્વત્ર ગતિશક્તિઃ સ્યાત્ સ્ત્રીણાં મન્મથરૂપધૃક્ ।
અણિમાલઘિમાપ્રાપ્તિગુણાદિસિદ્ધિમાપ્નુયાત્ ॥ ૬૩-૭૮॥

યોગિનીવલ્લભો ભૂત્વા વિચરેત્ સાધકાગ્રણીઃ ।
યથા ગુહો ગણેશશ્ચ તથા સ મે હિ પુત્રકઃ ॥ ૬૩-૭૯॥

શ્રીમાન્ કુલીનઃ સારજ્ઞઃ સર્વધર્મવિવર્જિતઃ ।
શનૈઃ શનૈર્મુદા યાતિ ષોડશારે યતીશ્વરઃ ॥ ૬૩-૮૦॥

યત્ર ભાતિ શાકિનીશઃ સદાશિવગુરુઃ પ્રભુઃ ।
ક્રમેણ પરમં સ્થાનં પ્રાપ્નોતિ મમ યોગતઃ ॥ ૬૩-૮૧॥

મમ યોગં વિના નાથ તવ ભક્તિઃ કથં ભવેત્ ।
એતત્સમ્મોહનાખ્યસ્ય કવચસ્ય પ્રપાઠતઃ ॥ ૬૩-૮૨॥

વાણી વશ્યા સ્થિરા લક્ષ્મીઃ સર્વૈશ્વર્યસમન્વિતઃ ।
ત્યાગિતા લભ્યતે પશ્ચાન્નિઃસઙ્ગો વિહરેત્ શિવઃ ।
સદાશિવે મનો યાતિ સિદ્ધમન્ત્રી મનોલયઃ ॥ ૬૩-૮૩॥

ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે મહાતન્ત્રોદ્દીપને સિદ્ધમન્ત્રપ્રકરણે
ષટ્ચક્રપ્રકાશે ભૈરવીભૈરવ સંવાદેઽનાહતેશ્વરસમ્મોહનાખ્યકવચં
નામ ત્રિષષ્ટિતમઃ પટલઃ ॥ ૬૩॥

The numbers correspond to paTala and verse numbers from Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

*Anahateshvarasammohana or Ishvarasammohana Kavacham*
pdf was typeset on September 14, 2020

Please send corrections to *sanskrit@cheerful.com*